**CLASS : 12th (Sr. Secondary)** **Code No. 3605**

**Series : SS-M/2018**

*रोल नं०* | | | | | | | | | | |

**SET : A**

# संस्कृत

## SANSKRIT

### *ACADEMIC/OPEN*

(Only for Fresh/Re-appear Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न **14** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

## (अपठित अवबोधनम्)

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

कस्मिंश्चित् अरण्ये अनेके पशवः वसन्ति स्म। एकदा पशूनां राजा सिंहः रोगपीड़ितः अभवत्। एकं शृगालं विहाय सर्वे पशवः रोगपीड़ितं नृपं द्रष्टुमागताः। एकः उष्ट्रः नृपाय एतत् न्यवेदयत् यत् अहंकारिणं शृगालं विहाय सर्वे भवन्तं द्रष्टुमागताः। एतच्छ्रुत्वा सिंहः क्रोधितोऽभवत्। स्वमित्रैः एतज्ज्ञात्वा शृगालः शीघ्रमेव सिंहस्य समीपे प्राप्तः। क्रोधितेन सिंहेन विलम्बेन आगमनकारणं पृष्टः शृगालोऽवदत् यदहं तु सर्वप्रथममागन्तुम् ऐच्छम् परं चिकित्सकात् औषधमपि आनेयमिति विचिन्त्य तत्रागच्छम्। तच्छ्रुत्वा प्रसन्नः सिंहः औषधविषये पृष्टवान्। शृगालः अवदत् यत्तेन औषधिस्तु न दत्ता परं चिकित्साक्रमम् उक्तवान् यत् उष्ट्रस्य रक्तपानेनैव रोगस्य शान्तिः भविष्यति। तदा सिंहः उष्ट्रमाहूय भक्त्या आगतं तं मारयित्वा तस्य रक्तं पीतवान् एवं स्वपिशुनतायाः दुष्फलम् उष्ट्रेण स्वयमेव प्राप्तम्।

*प्रश्नाः* – $2 \times 5 = 10$

(क) अनेके पशवः कुत्र वसन्ति स्म ?

(ख) शृगालः शीघ्रमेव कस्य समीपे प्राप्तः ?

(ग) उष्ट्रेण कस्याः दुष्फलं प्राप्तम् ?

(घ) रोगपीडितः कः अभवत् ?

(ङ) 'पृष्टः' - अत्र कः प्रत्ययः प्रयुक्तः ?

### खण्डः 'ख'

## (रचनात्मक–कार्यम्)

**2.** ***विषयमेकमधिकृत्य*** लघुनिबन्धं संस्कृतभाषया रचयत – 6

(क) प्रातःकालीन भ्रमणम्,

(ख) संस्कृतभाषायाः महत्त्वम्,

(ग) मम प्रियं पुस्तकम् (गीता)।

## खण्डः 'ग'

## (पठित–अवबोधनम्)

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) राजवचनमनुगच्छति जनो भयात्। उपदिश्यमानमपि ते न शृण्वन्ति। अवधीरयन्तः खेदयन्ति हितोपदेशदायिनो गुरून्।

**अथवा**

(ख) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालन-निर्मलापि कालुष्यमुपयाति बुद्धिः। नाशयति च पुरुषमत्यासङ्गो विषयेषु।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) तमध्वरे विश्वजिति क्षितीशं, निःशेषविश्राणितकोषजातम्।
उपात्तविद्यो गुरुदक्षिणार्थी, कौत्सः प्रपेदे वरतन्तुशिष्यः।।

**अथवा**

(ख) बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्।।

**5.** अधोलिखितासु सूक्तिषु मात्र ***द्वयोः*** सूक्त्योः भावार्थं हिन्दीभाषया लेख्यम् – 2 × 2 = 4

(क) उपभोक्तृणामपि अभियोगो नास्ति विभागस्य विपक्षे।

(ख) एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।

(ग) शरद्धनं नार्दति चातकोऽपि।

(घ) कोटीश्चतस्रो दश चाहरेति।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तानानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

कदाचित् कदाचित्त्वयं क्रूरः 'किन्तुः' मुखस्य कवलमप्याच्छिनत्ति। स्वल्पदिनानामेव वर्तास्ति। आयुर्वेदमार्तण्डस्य श्रीमतः स्वामिमहाभागस्य औषधिं निषेव्य अधुनैवाहं नीरोगोऽभवम्।

*प्रश्नाः* - $2 \times 1 = 2$

(क) 'किन्तुः' कं आच्छिनत्ति ?

(ख) कस्य औषधिं निषेव्य अधुनैवाहं नीरोगोऽभवम् ?

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तरे लेखनीये –

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।<br>
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।

*प्रश्नाः* - $2 \times 1 = 2$

(क) शतं समाः कथं जिजीविषेत् ?

(ख) 'अस्ति' इति पदस्य कः पदपरिचयः ?

**8.** रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत - $2 \times 1 = 2$

(क) <u>अतिजवेन</u> दूरमतिक्रान्तः स चपलः दृश्यते ?

(ख) <u>कर्म</u> ज्यायो ह्यकर्मणः।

**खण्डः 'घ'**

**(संस्कृत-साहित्य-परिचयः)**

**9.** पण्डितराजजगन्नाथस्य ***अथवा*** महाकवेः माघस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः - 4

(i) कादम्बरी,

(ii) पाषाणीकन्या।

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार-परिचयः)**

**11.** अधोनिर्दिष्टछन्दस्सु मात्र***द्वयोः*** संस्कृतभाषया लक्षणोदाहरणौ लिखत – $2 \times 4 = 8$

(i) वसन्ततिलका,

(ii) अनुष्टुप्,

(iii) उपजातिः।

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत – 2 × 4 = 8

(i) रूपकः,

(ii) अर्थान्तरन्यासः,

(iii) व्याजस्तुतिः।

**खण्डः 'च'**

**(अनुप्रयुक्त-व्याकरणम्)**

**13.** (क) दीर्घसन्धेः ***अथवा*** यणसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) कर्मकारकस्य ***अथवा*** अधिकरणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) द्विगुसमासस्य ***अथवा*** द्वन्द्वसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

**खण्डः 'छ'**

**[ बहुविकल्पीय-वस्तुनिष्ठप्रश्नाः ]**

**14.** अधस्तनप्रश्नानां लिखितोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत – 16 × 1 = 16

(क) 'अनेजदेकम्' इति पदे कः सन्धिविच्छेदः ?

(i) अनेजत् + एकम् (ii) अन + जते + कम्

(iii) अनेजद् + कम् (iv) अने + जेतकम्

(ख) 'ईश + आवास्यम्' इति पदे किं सन्धिपदम् ?

(i) ईशासम् (ii) ईशास्यम्

(iii) ईशावासम् (iv) ईशावास्यम्

(ग) 'शान्तः' इति पदे कः सन्धिः ?

(i) विसर्गसन्धिः (ii) पूर्वरूपसन्धिः

(iii) परसवर्णसन्धिः (iv) व्यञ्जनसन्धिः

(घ) 'उपकूलम्' इति पदे विग्रहोऽस्ति -

(i) कूलाय इति (ii) कूलेन समीपे

(iii) कूले इति (iv) कूलस्य समीपं

(ङ) 'सभापण्डितः' इति पदे कः समासः ?

(i) द्वितीयातत्पुरुषः (ii) सप्तमीतत्पुरुषः

(iii) षष्ठीतत्पुरुषः (iv) पञ्चमीतत्पुरुषः

(च) 'जगतः एकनाथः' इति विग्रहे किं समस्तपदम् ?

(i) जगदेकनाथः (ii) जगेकनाथः

(iii) जगतानाथः (iv) जगतोनाथः

(छ) 'राजन्', षष्ठी एकवचने रूपम् -

(i) राजनस्य (ii) राज्ञः

(iii) राज्ञा (iv) राज्ञाम्

(ज) 'अश्वात्' इति पदे का विभक्तिः ?

(i) तृतीया (ii) षष्ठी

(iii) सप्तमी (iv) पञ्चमी

(झ) 'कुरु' इति पदे कः धातुः ?

(i) क्री (ii) कर्

(iii) कृ (iv) कार

(ञ) 'प्रवर्तन्ते' इति पदे कः पुरुषः ?

(i) प्रथमपुरुषः (ii) उत्तमपुरुषः

(iii) अन्यपुरुषः (iv) मध्यमपुरुषः

(ट) 'दातुम्' इति पदे कः प्रत्ययः ?

(i) क्तवतु (ii) शतृ

(iii) क्त्वा (iv) तुमुन्

(ठ) 'आ + वृ + क्त' एषां संयोगे किं रूपम् ?

(i) आवतः (ii) आवुत्तः

(iii) आवृत्यः (iv) आवरत्य

(ड) 'नमः' इति उपपदयोगे का विभक्तिः ?

(i) चतुर्थी (ii) पञ्चमी

(iii) प्रथमा (iv) सप्तमी

(ढ) 'जगत्' इति पदस्य समानार्थकपदमस्ति –

(i) तनः (ii) संसारः

(iii) गात्रम् (iv) शिवः

(ण) 'समतिक्रामत्सु' इति पदस्य विशेष्यम् –

(i) पत्रम् (ii) महान्

(iii) दिवसेषु (iv) मूर्खः

(त) 'तमसा' इति पदस्य विलोमपदमस्ति –

(i) प्रकाशेन (ii) मध्यः

(iii) भयः (iv) अङ्गः